# Brahmaproktam Kashipraptisadhanopadesham

# બ્રહ્માપ્રોક્તં કાશીપ્રાપ્તિસાધનોપદેશમ્

## Document Information

Text title : Brahmaproktam Kashipraptisadhanopadesham

File name : kAshIprAptisAdhanopadeshambrahmA.itx

Category : shiva, shivarahasya, upadesha, advice, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 470-484||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં કાશીપ્રાપ્તિસાધનોપદેશમ્

બ્રહ્મોવાચ -
કાશી શ્રીમન્મહાદેવપ્રસાદેન ભવિષ્યતિ ॥ ૪૭૦॥

મહાદેવપ્રસાદાર્થં પૂજયસ્વ મહેશ્વરમ્ ।
પુણ્યેઽસ્મિન્કાર્તિકે માસિ સોમવારેષુ શઙ્કરમ્ ॥ ૪૭૧॥

ઉપોષ્યાભ્યર્થય પ્રીત્યા નિશિ યામચતુષ્ટયે ।
અસ્ય કાર્તિકમાસસ્ય ચત્વારઃ સોમવાસરાઃ ॥ ૪૭૨॥

પુણ્યેષ્વેતેષુ સર્વેષુ નિશિ પૂજય શઙ્કરમ્ ।
શિવસ્યોમાસમેતસ્ય વાસરઃ સોમવાસરઃ ॥ ૪૭૩॥

તસ્મિન્નભ્યર્ચિતે શમ્ભૌ પ્રસીદતિ મહેશ્વરઃ ।
અદ્યૈવ યાહિ કેદારં તત્રોર્જે માસિ સાદરમ્ ॥ ૪૭૪॥

પૂજયિત્વા મહાદેવં કાશી પ્રાપ્સ્યસિ સર્વથા ।
કેદારાન્યશિવસ્થાનેષ્વર્ચિતોઽસ્તિ ત્વયા શિવઃ ॥ ૪૭૫॥

કેદારેઽસ્મિન્પુણ્યમાસિ પૂજયસ્વ સદાશિવમ્ ।
બિલ્વપલ્લવધુત્તૂરદ્રોણનીલોત્પલાદિભિઃ ॥ ૪૭૬॥

પૂજયિત્વા શિવં ધૂપૈર્દીપાદ્યૈશ્ચ પ્રસાદય ।
મયોપેન્દ્રેણ ચન્દ્રેણ સૂર્યાદ્યૈરમરૈરપિ ॥ ૪૭૭॥

વિશેષેણાર્ચિતઃ સામ્બઃ કાર્તિકે માસિ સાદરમ્ ।
અમ્બાપ્યુપોષ્ય વિશ્વેશં કાર્તિકે માસિ ભક્તિતઃ ॥ ૪૭૮॥

અર્ચયિષ્યન્તિ હેરમ્બસ્કન્દાદ્યાશ્ચાર્ચયન્તિ તમ્ ।
ઊર્જશુક્લચતુર્દશ્યાં કાશ્યાં વિશ્વેશ્વરં પ્રભુમ્ ॥ ૪૭૯॥

સમર્ચયિતુમિન્દ્રાદ્યૈર્ગમ્યતેઽસ્માભિરાદરાત્ ।
ત્વયાપિ તદ્દિને કાશી સમ્પ્રાપ્યા પુણ્યયોગતઃ ॥ ૪૮૦॥

અતસ્તદર્થં શીઘ્રં એણ પ્રસન્નં કુરુ શઙ્કરમ્ ।
ઇત્યેતદ્વચનં શ્રુત્વા તન્નત્વાહમિહાગતઃ ॥ ૪૮૧॥

અત્રોર્જેમાસિ ગૌરીશઃ પૂજિતશ્ચ મયા તદા ।
તતઃ શિવપ્રસાદેન કાશી પાપાપનોદિની ॥ ૪૮૨॥

ભુક્તિમુક્તિપ્રદા પુણ્યા મયા પ્રાપ્તા શિવાત્મિકા ।
તતો વિશ્વેશ્વરો દૃષ્ટઃ સંસારભયનાશકઃ ॥ ૪૮૩॥

પૂજિતશ્ચ મયા ભક્તયા વિશ્વેશો ભક્તવત્સલઃ ।
બહુકાલં સ્થિતં કાશ્યાં તતોઽત્ર તુ કદાચન ॥ ૪૮૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં કાશીપ્રાપ્તિસાધનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૪૭૦-૪૮૪ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 470-484 ..

Notes:

Brahmā બ્રહ્મા tells Devarṣi Nārada દેવર્ષિ નારદ that one can attain Kāśī કાશી only with the Grace of Mahādeva મહાદેવ; and highlights the importance of worshiping Śiva શિવ in the month of Kārtika કાર્તિકમાસ, especially during the four Mondays of the month કાર્તિક સોમવાર in order to acquire that Grace. Kāśī Viśveshvara કાશી વિશ્વેશ્વર is especially worshiped on Ūrja/Kārtika Śukla Caturdaśī ઊર્જ/કાર્તિક શુક્લ ચતુર્દશી.

Encoded and proofread by Ruma Dewan

*Brahmaproktam Kashipraptisadhanopadesham*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*